# झारखण्ड शैक्षणिक अनुसंधान एवं प्रशिक्षण परिषद, राँची , झारखण्ड

## वार्षिक परीक्षा (Annual Examination)

## 2024-2025

## मॉडल प्रश्न पत्र

| कक्षा – XII<br>Class-XII | विषय – संस्कृत ऐच्छिक<br>Subject- Sanskrit Elective | समय – 3 घण्टा<br>Time- 3 Hour | पूर्णांक – 80<br>Marks - 80 |
|---|---|---|---|

**सामान्य-निर्देशाः-**

- **अस्मिन् प्रश्नपत्रे 30 वस्तुनिष्ठप्रश्नाः सन्ति।**
- **सर्वे प्रश्नाः समानांकाः।**
- **सर्वे प्रश्नाः अनिवार्याः।**
- **प्रदततेषु विकल्पेषु समुचितम् उत्तरं चिनुत।**
- **अपठितावबोधनम्**

**अधोलिखित गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तरं विकल्पेषु चिनुत-**

अनुच्छेदः

गीतायाः द्वादशे अध्याये भगवान् कृष्णः वदति - "यः निन्दां स्तुतिं च समानतया स्वीकरोति, सः भक्तः मम प्रियः।" 'तुल्यनिन्दास्तुतिः' इति शब्दः सामान्य इव प्रतीयते परन्तु तदनुगुणम् आचरणं महत् कष्टसाधकम्। निन्दावचनानां श्रवणेन मानसिकः उद्वेगः जायते। स्तुतिशब्दानां श्रवणेन मनसः उल्लासः भवति। निन्दकाः, दोषदर्शयितारः च भगवता एव प्रेष्यन्ते। यः निन्दकस्य कथनं शान्तिपूर्वकं शृणोति विरोधं न करोति अपितु आत्मनिरीक्षणं करोति, सः वर्धते। यदा स्तुतिः श्रूयते तदा 'अत्र मम किमपि वैशिष्ट्यं नास्ति' इति चिन्तनीयम्। एतत् सर्वं मम गुरुजनानां प्रसादः इति यः स्वीकरोति सः विनयी भवति। अतः

तुल्यनिन्दास्तुतित्वम् अभ्यासेनैव सिध्यति। यः एवम् आचरति, सः जीवने निरन्तरम् उन्नतिन प्राप्नोति।

प्रश्नाः

1.निन्दकाः केन एव प्रेष्यन्ते ?

क.पशुना

ख.भगवता

ग.मित्रेण

घ. मुनिना

2. गीतायाः कस्मिन् अध्याये प्रियभक्तस्य लक्षणं भगवता प्रोक्तम् ?

क.द्वादशे

ख. प्रथमे

ग. द्वितीये

घ. सप्तमे

3. 'जायते' इति क्रियापदस्य कर्तृपदं किम् ?

क.विनयी

ख.निन्दकाः

ग.मम

घ.उद्वेगः

4.'कृपा' इति अर्थ किं पदमत्र प्रयुक्तम् ?

क.निन्दा

ख.प्रसादः

ग.भक्तः

घ. निरन्तरम्

5. 'उद्वेगस्य' किं विलोमपदमत्र प्रयुक्तम् ?

क.उल्लासः

ख.वैशिष्ट्यम्

ग.विरोधम्

घ.स्तुतिः

**निर्देशः - अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तरं विकल्पेषु चिनुत-**

**गद्यांशः**

**"तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां माहात्म्यम् एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। * द्वितीयरत्नेन भोजनादिकम् अमृततुल्यम् उत्पद्यते। तृतीयरत्नात्**

**चतुरङ्गबलं भवति। चतुर्थाद् रत्नादिदिव्याभरणानि जायन्ते। तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति।"**

प्रश्ना:

6. प्रथमेन रत्नेन किं स्मर्यते ?

क.भोजनादिकम्

ख.चतुरङ्गबलं

ग.रत्नादिदिव्याभरणानि

घ.यद्वस्तु

7. अमृततुल्यं किमुत्पद्यते ?

क.रत्नादि

ख.चतुरङ्गबलं

ग.भोजनादिकम्

घ. जीवनम्

8.(अहम्) राज्ञे किं दास्यामि ?

क.भोजनादिकम्

ख.चतुरङ्गबलं

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT

ग.रत्नचतुष्टयम्

घ.रत्नादिदिव्याभरणानि

9.'ददाति' अस्य कर्तृपदं किम् ?

क.चतुरङ्गबलं

ख.रत्नम्

ग.भोजनादिकम्

घ.राजा

10. 'आदाय' अस्य कः पर्यायः अत्र प्रयुक्तः ?

क.गृहीत्वा

ख.स्मर्यते

ग.दास्यामि

घ.उत्पद्यते

**निर्देशः - अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तरं विकल्पेषु चिनुत-**

**कौसल्या - जात! अस्ति ते माता ? स्मरसि वा तातम् ?**

**लवः - नहि।**

**कौसल्या - ततः कस्य त्वम् ?**

**लवः - भगवतः सुगृहीतनामधेयस्य वाल्मीकेः।**

**कौसल्या - अयि जात! कथयितव्यं कथय।**

**लवः - एतावदेव जानामि। (प्रविश्य सम्भ्रान्ताः)**

**बटवः - कुमार ! कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः।"**

11.'वाल्मीकेः' अस्य किं विशेषणम् ?

क.सुगृहीतनामधेयस्य

ख.कुमार

ग.जात

घ.कुमारी

12. अस्माभिः कः भूतविशेषः प्रत्यक्षीकृतः ?

क. अजः

ख. गजः

ग.अश्वः

घ.व्याघ्रः

13. 'अस्माभिः' इति सर्वनामपदं केभ्यः प्रयुक्तम् ?

क. अश्वेभ्यः

ख.पशूभ्यः

ग. वृक्षेभ्यः

घ.बटुभ्यः

14. 'इदानीम्' अस्य कः पर्यायः अत्र प्रयुक्तः ?

क.अधुना

ख.भगवतः

ग.कोऽपि

घ.भूतविशेषो

15.'परोक्षीकृतः' अस्य विलोमपदं किम् ?

क.प्रविश्य

ख.प्रत्यक्षीकृतः

ग.एतावदेव

घ.कथयितव्यं

**(व्याकरण -कार्यम्)**

16. 'वक्तव्यम्' अस्य प्रत्ययं वियोज्य लिखत।

(क) वक्तव्यत्

(ख) वद्+ तव्यत्

(ग) व +तव्यत्

(घ) वच्+ तव्यत्

17. 'दर्शनीयम्' पदे कः प्रत्ययः ?

(क) णीयम्

(ख) करणी

(ग) अनीयर्

(घ) णिनि

18. 'नायकः' इत्यस्य सन्धिविच्छेदं चिनुत।

(क) ना+यक:

(ख) नाय+क

(ग) ने+ अक:

(घ) नै+ अक:

19. 'अनुविष्णु' अस्य सामासिकविग्रहं चिनुत ।

(क) विष्णोः सह

(ख) विष्णोः विना

(ग) विष्णो पूर्वम्

(घ) विष्णो: पश्चात्

20. नीलं कमलं अस्य समस्तपदं लिखत ।

(क) नीलकमलम्

(ख) नीलाकमला

(ग) नीलकमलानि

(घ) नीले कमले

**रेखांकितं पदमाधृत्य प्रश्ननिर्माणं कुरुत -**

**21. सहसा विदधीत न <u>क्रियाम्</u>।**

**क. केन**

ख. काम्

ग. कम्

घ. कस्मिन्

22. बुद्धियुक्तो जहातीह सुकृत-दुष्कृते ।

क. केन

ख. काम्

ग. कम्

घ. कस्मिन्

23. धनेन सर्वमपि लभ्यते ।

क. कम्

ख. केन

ग. कस्मै

घ. कस्मात्

24. तस्याः दार्शनिकैः सप्तधा विभागः कृतः ।

क. केन

ख. कस्मिन्

ग. कैः

घ. कयोः

25. <u>पत्रस्य</u> अर्धाधिकं भागं अश्रुधारा आर्द्राकरोति स्म।

क. कस्प

ख. कीदृशः

ग. केन

घ. कुत्र

निर्देशः - निर्देशानुसारम् उत्तरं चिनुत -

26. 'बालकौतुकम्' इति पाठः कस्य रचना ?

क. कालिदासस्य ।

ख. भर्तृहरेः

ग. बाणभट्टस्य

घ. सुश्रुतस्य

27. अन्ताराष्ट्रिययोगदिवसः कदा समायोज्यते?
क. 19 जून
ख. 20 जून
ग. 21 जून

घ. 22 जून
28. रघुवंशात् कः पाठः संकलितः?
क. रघुकौत्ससंवादः
ख. बालकौतुकम्
ग. सूक्ति-सुधा
घ. दीनबंधुश्रीनायारः
29. 'बालकौतुकम्' इति पाठः कस्य रचना ?
क. कालिदासस्य।
ख. भर्तृहरेः
ग. बाणभट्टस्य
घ. सुश्रुतस्य
30. 'पाषाणी कन्या' इति कस्य रचना ?
क. चन्द्रशेखरदासवर्मणः
ग. कालिदासस्य।
ख. अम्बिकादत्तव्यासस्य
घ. बाणभट्टस्य

# उत्तराणि

(Class 12- Sanskrit)

1.ख.भगवता

2.क.द्वादशे

3.घ.उद्वेगः

4.ख.प्रसादः

5.क.उल्लासः

6.घ.यद्वस्तु

7.ग.भोजनादिकम्

8.ग.रत्नचतुष्टयम्

9.ख.रत्नम्

10.क.गृहीत्वा

11.क.सुगृहीतनामधेयस्य

12.ग.अश्वः

13.घ.बटुभ्यः

14.क.अधुना

15.ख.प्रत्यक्षीकृत:

16.(घ) वच्+ तव्यत्

17.(ग) अनीयर्

18.(घ) नै+ अक:

19.(घ) विष्णो: पश्चात्

20.(क) नीलकमलम्

21.ख. काम्

22.घ. कस्मिन्

23.ख. केन

24.ग. कै:

25.क. कस्य

26.ख. भर्तृहरेः

27.ग. 21 जून

28.क. रघुकौत्ससंवादः

29.ख. भर्तृहरेः

30.क. चन्द्रशेखरदासवर्मणः

नवोन्मेष शोध नेतृत्व
JCERT

**CLASS -12**

**SUB- SANSKRIT (ELECTIVE)**

**SUBJECTIVE TYPE**

**सामान्यनिर्देशाः-**

**1 सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव कर्तव्यानि।**

**2. प्रश्नानां संख्याः 21 सन्ति।**

**3. प्रश्नसंख्या 1 तः 8 पर्यन्तम् अतिलघूत्तरीयाः प्रश्नाः सन्ति। अस्य कृते 2-2 अंकौ निर्धारितौ स्तः। केचन षड् प्रश्नान् उत्तरत।**

**4.प्रश्नसंख्या 9 तः 16पर्यन्तम् लघुत्तरीयाः प्रश्नाः सन्ति। अस्य कृते 3- 3 अंकाः निर्धारिताः। केचन षड् प्रश्नाः समाधेयाः।**

**5. प्रश्नसंख्या 17 तः 22 पर्यन्तम् दीर्घोत्तरीयाः प्रश्नाः सन्ति। अस्य कृते 5-5 अंकाः निर्धारिताः। केचन चतुरः प्रश्नान् उत्तरत।**

**खण्ड -क**

**निर्देशः अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तान् प्रश्नान् निर्देशानुसारम् उत्तरत-**

**शिष्यः गुरुम् अपृच्छत्- "महोदय सुखसुविधयोः को भेदः ?" गुरुः अवदत् "अहम् एकदा एकस्य धनिनो गृहे अतिथिः अभवम्। तस्य आतिथ्यगृहं दृष्ट्वा मनसि अतिव्यथितः आसम्। तत्र सर्वतः बहुमूल्यानि उपकरणानि आसन्, भ्रमणेऽपि अवधानतायाः आवश्यकता अभवत्, कदाचित् किमपि उपकरणं त्रुटितं न स्यात्। आसीत् तत्र सर्वा सुखसामग्री परम् आनन्दस्य न अवर्तत कोऽपि उपभोक्ता। आतिथ्यस्थानं नासीद् उपवेष्टुं योग्यम्।" एवमुक्त्वा गुरुः शिष्यं समबोधयत्-" उपकरणैः प्राप्यते नैव सुखम्। तत् तु मनसः आनन्देन एव जायते।"**

**प्रश्नाः-**

**. पूर्णवाक्येन उत्तरत-**

**1. शिष्यः कयोः भेदम् अपृच्छत् ? 2**

**2. गुरुः कस्य गृहे अतिथिः अभवत् ? 2**

3. सुखसामग्र्याः आनन्दस्य कः न आसीत् ? 2

4. निर्देशानुसारं उत्तरं लिखत - 1/2*4=2

(i) 'अभवम्' इति क्रियापदस्य किं कर्तृपदम् ?

(ii) 'अनवधानता' अस्य विलोमपदं किम् ?

(iii) 'दृष्ट्वा' पदे कः प्रत्ययः प्रयुक्तः?

(iv) ' बहुमूल्यानि उपकरणानि ' अत्र विशेषणपदं किम् ?

(पठितावबोधनम् )

अधोलिखितं गद्यांशं , पद्यं, च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत-

गद्यांशः

(ख) गद्यांशः

"तस्मै राज्ञे व्ययार्थं रत्नचतुष्टयं दास्यामि। एतेषां माहात्म्यम् एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति। द्वितीयरत्नेन भोजनादिकम् अमृततुल्यम् उत्पद्यते। तृतीयरत्नात् चतुरङ्गबलं भवति। चतुर्थाद् रत्नादिदिव्याभरणानि जायन्ते। तदेतानि रत्नानि गृहीत्वा राज्ञो हस्ते प्रयच्छेति।"

प्रश्नाः

पूर्णवाक्येनोत्तरत-

5. प्रथमेन रत्नेन किं स्मर्यते ? 2

6. यथानिर्देशमुत्तरत- ½*4=2

(i) 'ददाति' अस्य कर्तृपदं किम् ?

(ii) 'आदाय' अस्य कः पर्यायः अत्र प्रयुक्तः ?

(iii)'एतेषां माहात्म्यम्' अत्र 'एतेषाम्' इतिपदं केभ्यः प्रयुक्तम् ?

(iv) 'विषम्' अस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

**पद्यम्**

"पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम्,
दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रान्,
किं व्याख्यानैर्व्रजति स पुनर्दूरमेयेहि यामः।"

झारखण्ड शैक्षिक अनुसंधान एवं प्रशिक्षण परिषद्, राँची
नवोन्मेष शोध नेतृत्व
JCERT

प्रश्नाः

पूर्णवाक्येनोत्तरत-

7. दीर्घग्रीवः कः भवति ?

8.यथानिर्देशमुत्तरत- 1/2*4=2

(i) 'सततम्' अस्य कः पर्यायः?

(ii) 'अग्रे' अस्य विलोमपदं किम्?

(iii)' चत्वारः खुराः' अत्र विशेष्यपदं किम्?

(iv) 'दीर्घग्रीवः स भवति' अत्र 'सः' कस्मै प्रयुक्तम् ?

## खण्ड - ख

9. अधोलिखितस्य श्लोकस्य अन्वये रिक्तस्थानपूर्ति कुरुत : 3

(अ) ईशावास्यमिदं सर्व यत्किंच जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद् धनम् ॥

अन्वयः

जगत्यां यत् किम् च (i) —--------इदम् सर्वम् (ii)------- तेन त्यक्तेन भुञ्जीथाः, कस्यस्वित् धनं मा (iii)-------।

10. वाक्यं शुद्धं कुरुत- 3

क. त्वं पत्रं लिखामि।

ख. मया गृहं गच्छति।

ग. पांडवाः पञ्च आसीत्।

11. उचितरुपैः रिक्तस्थानं पूरयत- 3

क. —----पत्रं लिखन्ति। (छात्र)

ख. —----कालिदासः श्रेष्ठः (कवि)

ग. छात्राः —-----गच्छन्ति। (विद्यालय)

12. प्रत्ययं संयोज्य लिखत- 3

क. नम् + क्त्वा=---

ख. दृश् + तव्यत्=--

ग. कुमार+ ङीप्=—-

13. अधः समस्तपदानां विग्रहाः दत्ताः, तानाश्रित्य समस्तपदानि रचयत - 3

(क) धनाय आदेशः-
(ख) गुणानां लुब्धाः-

(ग) कर्मसु नैपुण्यम्:-
14. शब्दार्थं लिखत--- 3

क. कलविङ्काः-----

ख. शौचम्-----

ग. जुगुप्सा -------
15. रेखाङ्ङ्कितपदस्य विभक्तिं तत् कारणञ्च लिखत - 3

क. सः कर्णेन बधिरः।
ख. पिता पुत्राय कुप्यति।
ग. विद्यालयम् उभयतः वृक्षाः सन्ति।
16. संधिविच्छेदं कुरुत- 3

(क) कोऽपि- कः +........

(ख) चाभिरुचिर्व्यसनं =च + ……+ व्यसनम्

(ग) चन्द्रोज्ज्वलाः = ….+.....

खण्ड -'ग'

17. श्लोकमेलनं कुरुत 5

'अ' 'आ'

| | |
|---|---|
| कर्मण्येवाधिकारस्ते | यत्किञ्च जगत्यां जगत् । |
| ददाति प्रतिगृह्णाति | मा फलेषु कदाचन । |
| ईशावास्यमिदं सर्वं | गुह्यमाख्याति पृच्छति । |
| अस्ति यद्यपि सर्वत्र | त्वं कर्म ज्यायो ह्यकर्मण:। |
| नियतं कुरु कर्म | नीरं नीरजराजितम्। |

18. विद्यालयशुल्कक्षमापनार्थं स्वप्राचार्यं प्रति एकं पत्रं लिखत। 5

19. नाट्यसाहित्यस्य वैशिष्ट्यं प्रतिपादयत। चम्पूकाव्यस्य उदाहरणम् अपि लिखत।5

20.अधोलिखितरचनानां लेखकानां नामानि लिखत। (केवलं पञ्चानाम्) 1 * 5 = 5

क. रामायणम्-

ख. पाषाणी कन्या-


ग. महाभारतम्-

घ. रघुवंशम्-

ङ. उत्तररामचरितम्-

च. कादम्बरी-

21.मंजूषासहायतया चित्रं दृष्ट्वा पञ्च वाक्यानि रचयत। 5



| |
|---|
| सायंकाले, वृक्षाः, हरिताः, गृहाणि, तृणानि, सूर्यः, आकाशः, वर्णः |

22. अधोलिखितभावार्थस्य रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कृत्वा लिखत। 5

(अ) "असूर्या नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥"

भावार्थः

संसारे स्वेच्छया मृत्योः ----(i)------महत्पापं भवति। ये जनाः-----(ii)-----भवन्ति ते मृत्योः------(iii)------

यान् लोकान् प्राप्नुवन्ति तत्र------ (iv) -----अन्धकारः भवति तत्र कीदृशम् अपि ------- (v) -----न भवति अतः आत्मवधो नैव कार्यः।

मञ्जूषा-

| |
|---|
| वरणम्, अनन्तरम्, सुखम्, एतादृशाः महान् |

नवोन्मेष शोध नेतृत्व
JCERT